सकण्टकः, पुं, (कण्टकेन सह वर्त्तमानः।) शैवालः। इति शब्दचन्द्रिका॥ करञ्जविशेषः। इति रत्नमाला॥ नाटाकरञ्ज इति भाषा॥ कण्टकयुक्ते, त्रि। यथा,—
"शीतलोष्णसमायुक्तसकण्टकदलान्वित।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः॥"
इति तिथ्यादितत्त्वम्॥
(रोमाञ्चिते च त्रि। यथा, कथासरित्सागरे। २५। २२०।
"स तं साहसिकत्रासभीतेरिव सकण्टकैः।
अङ्गैः प्रणतमालिङ्ग्य मुमुदे भूपतिश्चिरम्॥")
सकरः, त्रि, हस्तयुक्तः। राजस्वविशिष्टः। शुण्डयुक्तः। किरणविशिष्टः। करेण सह वर्त्तते योऽसौ। इति बहुव्रीहिसमासनिष्पन्नः॥
सकरुणः, त्रि, (करुणया सह वर्त्तमानः।) करुणायुक्तः। सदयः। यथा,—
"भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम्॥"
इत्यानन्दलहरी॥
सकर्णः, त्रि, (कर्णाभ्यां सह वर्त्तमानः।) श्रवणशीलः। तत्पर्य्यायः। श्रुतितत्परः २। इति जटाधरः॥ कर्णयुक्तश्च॥
सकर्म्मकः, पुं, (कर्म्मणा सह वर्त्तमानः। कप्।) कर्म्मयुक्तधातुः। कर्म्मान्वयिक्रियार्थकः। यथा। क्वचित् सकर्म्मकाद्धातोर्भावेऽपि क्रियाव्याप्तिरस्ति। यथा। कां दिशं गन्तव्यम्। इति मुग्धबोधटीकायां दुर्गादासः॥ (कर्म्मयुक्ते, त्रि। यथा, भागवते। ५। २०। ३२।
"तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति॥" "सकर्म्मकेण ब्रह्मसालोक्यादिसाधनेन।" इति तट्टीका॥)
सकलं, त्रि, (कलया सह वर्त्तमानम्।) समुदायः। तत्पर्य्यायः। समम् २ सर्व्वम् ३ विश्वम् ४ अशेषम् ५ कृत्स्नम् ६ समस्तम् ७ निखिलम् ८ अखिलम् ९ निःशेषम् १० समग्रम् ११ पूर्णम् १२ अखण्डम् १३ अनूनकम् १४। इत्यमरः॥ अनन्तम् १५। इति शब्दरत्नावली॥ (यथा, भागवते। ४। २८। ४।
"द्वार्भिः प्रविश्य सुभृशं प्रार्द्दयन् सकलां पुरीम्॥" कला प्रकृतिस्तया सह वर्त्तते इति। सगुणम्। यथा महाभारते। १३। १६। ८।
"निष्कलं सकलं ब्रह्म निर्गुणं गुणगोचरम्॥")
सकामः, त्रि, (कामेन सह वर्त्तमान इति।) कामनाविशिष्टः। यथा,—
"अकामो वा सकामो वा यत्र क्वापि बहिर्जले
इह चामुत्र दुःखानि माघस्नायी न पश्यति॥"
इति तिथ्यादितत्त्वम्॥
सकाशः, पुं, (काशः प्रकाशस्तेन सह वर्त्तते इति।) समीपः। यथा,—
"देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
काशयुक्ते, त्रि॥
सकुरुण्डः, पुं, साकुरुण्डवृक्षः। इति राजनिर्घण्टः॥
सकुलः, पुं, (कुलेन सह वर्त्तते इति।) शकुलमत्स्यः। इति शब्दरत्नावली॥
सकुल्यः, त्रि, (समाने कुले भवः। यत्।) सगोत्रः। यथा,—
"ज्ञाती तु बन्धुः सगोत्रास्तु स्वजनज्ञातिबान्धवाः।
सकुल्यबन्धुदायादसमानोदका अपि॥"
इति जटाधरः॥ * ॥
स्वावध्युर्द्ध्वतनाष्टमावधिदशमपुरुषपर्य्यन्तपुरुषत्रयम्। तेषां दशमपुरुषपर्य्यन्तसन्ततिः। स्वावध्यधस्तनाष्टमावधिदशमपुरुषपर्य्यन्तसन्ततिश्च। तेषामशौचं यथा, बृहस्पतिः।
"दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः॥"
इति शुद्धितत्त्वम्॥ * ॥
दायाधिकारिसकुल्यास्तु पञ्चमपुरुषावधयः। यथा। बौधायनः। प्रपितामहः पितामहः पिता स्वयं सोदर्य्यभ्रातरः सवर्णायाः पुत्त्रः पौत्त्रः प्रपौत्त्रो वा एतानविभक्तदायादान् सपिण्डान् आचक्षते। विभक्तदायादान् सकुल्यान् आचक्षते सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवतीति। इति दायतत्त्वं शुद्धितत्त्वञ्च॥*॥ तस्य कन्यादानाधिकारित्वं यथा। विष्णुः। पिता पितामहो भ्राता सकुल्यो मातामही माता चेति कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः परः। नारदश्च।
"पिता दद्यात् स्वयं कन्यां भ्राता वानुमतः पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्व्वेषां प्रकृतौ यदि वर्त्तते।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥"
इत्युद्वाहतत्त्वम्॥
सकुली, स्त्री, मत्स्यविशेषः। अस्या गुणादिस्तालव्यशकारादिशकुलशब्दे द्रष्टव्यः॥
सकृत्, व्य, (एक+"एकस्य सकृच्च।"५।४।१९। इति सुच् सकृदादेशश्च। संयोगान्तेति सुचो लोपः।) एकवारम्। (यथा,—
"सकृदंशो निपतति सकृत् कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत्॥"
इति महाभारतम्॥)
सह। इत्यमरः॥ विष्ठा। इति तट्टीका॥ (अस्मिन्नर्थे तालव्यशकारस्य प्रयोगः प्रायशो दृश्यते॥)
सकृत्प्रजः, पुं, (सकृत् प्रजा यस्य।) काकः। इत्यमरः॥ जातैकमात्रापत्ये, त्रि॥
सकृत्फला, स्त्री, (सकृत् फलानि यस्याः।) कदली। इति राजनिर्घण्टः॥
सकृद्गर्भः, पुं, (सकृत् गर्भो यस्य।) खेसरः। इति राजनिर्घण्टः॥ एकमात्रगर्भिण्यां, स्त्री॥
सकृद्वीरः, पुं, (सकृत् वीर इव।) एकवीरवृक्षः। इति राजनिर्घण्टः॥
सक्तः, त्रि, (सन्ज+क्तः।) अविरतः। इति हेमचन्द्रः॥ आसक्तः॥ (यथा, रामायणे। ६। ४। ११८।
"अन्योन्यैराहताः सक्ता ससृनुर्भीमनिःस्वनाः।
ऊर्म्मयः सिन्धुराजस्य महाभेर्य्य इवाहवे॥")
सक्तिः, स्त्री, सङ्गः। सन्जधातोः क्तिप्रत्ययेन निष्पन्ना॥ (यथा, किराते। ५। ४६।
"सक्तिं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति॥")
सक्तुः, पुं, (सच्यते सिच्यते इति। सच सेचने+"सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्।" उणा० १।७०। इति तुन्।) भृष्टयवादिचूर्णः। छातु इति भाषा। यथा,—
"भृष्टा यवाः पुनर्धाना धानाचूर्णन्तु सक्तवः॥"
इति हेमचन्द्रः॥
अस्य गुणादिः तालव्यादिशक्तुशब्दे द्रष्टव्यः॥ (यथा, कथासरित्सागरे। ४। १२२।
"एकः शरावः सक्तूनामिकः प्रत्यहमक्षसः।
शकटालस्य तत्रान्तः सपुत्त्रस्य न्यधीयत॥"
अर्द्धर्चादित्वात् क्लीवलिङ्गेऽपि दृश्यते॥ प्रायशोऽयं शब्दः बहुवचने प्रयुज्यते॥)
सक्तुकः, पुं, (सक्तुरिव। कन्।) विषभेदः। इति हेमचन्द्रः॥ स्वार्थे के सक्तुश्च॥
सक्तुफला, स्त्री, (सक्तव इव फलानि यस्याः। अजादित्वात् टाप्।) शमीवृक्षः। इत्यमरः॥
सक्तुफली, स्त्री, (सक्तव इव फलानि यस्याः। ङीष्।) शमीवृक्षः। इति शब्दरत्नावली॥
सक्थि, [न्] क्ली, (सज्यते इति। सन्ज सङ्गे+"असिसञ्जिभ्यां क्थिन्।" उणा० ३। १५४। क्थिन्।) ऊरुः। इत्यमरः॥ (यथा, मार्कण्डेये। १८। ४९।
"नृणां पदे स्थिता लक्ष्मीर्निलयं संप्रयच्छति।
सक्थ्नोश्च संस्थिता वस्त्रं तथा नानाविधं वसु॥")
शकटावयवविशेषः। इत्युणादिकोषः॥
सक्षमः, त्रि, क्षमताविशिष्टः। क्षमाविशिष्टः। क्षमेण क्षमया वा सह वर्त्तमानः। इति बहुव्रीहिनिष्पन्नः॥
सक्षारः, त्रि, लवणयुक्तः। क्षारेण सह वर्त्तमानः। इति बहुव्रीहिसमासनिष्पन्नः॥ (यथा, सुश्रुते। १। ४५।
"वातश्लेष्महरं वाप्यं सक्षारं कटुपित्तलम्॥")
सखा, [इ] पुं, (समानः ख्यायते इति। समान+ख्या+"समाने ख्यः सचोदात्तः।" उणा० ४। १३६। इति इञ्। टिलोपयलोपौ समानस्य सभावश्च।) सौहार्दयुक्तः। समानः ख्यायते जनैः नाम्नीति डिः मनीषादित्वात्